# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर, २०१८

| | | |
|---|---|---|
| कक्षा -शास्त्रितृतीयवर्षम् (SEM-5) | प्रश्नपत्रम् – ६ | गुणाः - ७० |
| विषयः - वेदः | (C. C.- 3.5.10.) | |
| दिनाङ्कः - १०/१२/२०१८ | अर्थसंग्रहः | समयः -१०.०० तः ०१.०० |

**प्रथमान्वितिः**

**प्रश्नः १ अधोलिखितेषु द्वयोरेव व्याख्या विधीयताम्।** **( १० )**

(क) तत्र पुरुषप्रवृत्त्यनुकूलो भावयितुर्व्यापारविशेषः शाब्दी भावना।

(ख) स च यागादिः "यजेत स्वर्गकामः" इत्यादि वाक्येन स्वर्गमुदिश्य पुरुषं प्रति विधीयते।

(ग) अपौरुषेयं वाक्यं वेदः।

**प्रश्नः २ अधोनिर्दिष्टयोः एकस्यैव प्रश्नस्योत्तरमुपस्थापयत।** **( १० )**

(क) शाब्दभावनायाः अंशत्रयं स्पष्टयत।

(ख) अर्थसंग्रहानुसारं विधेः प्रकारान् उपवर्णयत।

**द्वितीयान्वितिः**

**प्रश्नः ३ निम्नलिखितेष्वपि द्वयोरेव व्याख्या विधीयताम्।** **( १० )**

(क) अङ्गप्रधानसम्बन्धबोधको विधिर्विनियोगविधिः।

(ख) सा त्रिविधा-विभक्तिरूपा, एकाभिधानरूपा, एकपदरूपा चेति।

(ग) शब्दसामर्थ्यं लिङ्गम्।

**प्रश्नः ४ अधोलिखितयोरप्येकस्यैव प्रश्नस्योत्तरं लिखत।** **( १० )**

(क) अर्थसंग्रहस्य सामान्यः परिचयः प्रस्तूयताम्।

(ख) प्रकृतिविकृतियागस्वरूपं स्पष्टयत।

**तृतीयान्वितिः**

**प्रश्नः ५ अधोलिखितेषु द्वावेवांशौ व्याख्यायेताम्।** **( १० )**

(क) पशुधर्माणामग्नीषोमीयार्थत्वमनुष्ठानसादेश्यात्।

(ख) सामाख्या यौगिकः शब्दः।

(ग) प्रयोगप्राशुभावबोधकोविधिः प्रयोगविधिः।

**प्रश्नः ६ अधोलिखितयोः एकस्यैव प्रश्नस्योत्तरं लिखत । (१०)**

(क) प्रयोगविधिप्रसंगपतितानां श्रुत्यादिषट्प्रमाणानां संक्षिप्तं विवरणं प्रस्तूयताम् ।

(ख) नियमविधेः स्वरूपमुपस्थापयत ।

**चतुर्थान्वितिः**

**प्रश्नः ७ अधोलिखितेषु दश-एव प्रश्नाः समाधेयाः । (१०)**

(१) अर्थसंग्रहः केन दर्शनेन सम्बद्धोऽस्ति ?

(२) कोऽस्ति अर्थसंग्रहस्य रचयिता ?

(३) द्वादशलक्षणीति शब्दः कस्मै ग्रन्थाय प्रयुक्तः

(४) "यजेत" - इत्यस्मिन् कौ द्वौ भागौ मन्येते ?

(५) "मीमांसान्यायप्रकाशः" केन रचितोऽस्ति ?

(६) मीमांसान्यायमञ्जरी कस्य रचना अस्ति ?

(७) श्रौतयज्ञे यूपः कस्य काष्ठस्य भवति ?

(८) "मीमांसा" — शब्दस्य सामान्यार्थः को भवति ?

(९) "अर्थसंग्रहकौमुदी" कस्यास्ति रचना ?

(१०) "वेदं कृत्वा वेदिं करोति"- इत्यत्र कः प्रकारः श्रुतेः (अर्थसंग्रहसन्दर्भे) ?

(११) मन्त्र-पाठब्राह्मणपाठयोः को भवति बलीयान् ?

(१२) पदार्थबोधकवाक्यानां क्रमः किमुच्यते ?

(१३) अर्थसंग्रहे श्रौत्याः परिसंख्यायाः किमस्ति उदाहरणम् ?

(१४) "अथातो धर्मजिज्ञासा" - इति कस्य दर्शनस्य सूत्रमस्ति ?

(१५) "यज्ञतत्त्वप्रकाशः"- कस्यास्ति रचना ?

--००--